— ज्वलयिष्यमाणः-ज्वालयिष्यमाणः-प्रज्वलयिष्यमाणः, — जाज्वलिष्यमाणः ;

[1]ज्वल्-ज्वलौ-ज्वलः ; — — —

ज्वलितम्-तः, ज्वलितः-ज्वालितः-[A]प्रज्वलितः, जिज्वलिषितः, जाज्वलितः-तवान् ;

[2]ज्वालः-[B]ज्वाला, ज्वलः,[C] [3]ज्वलनः, [4]प्रज्वाली, ज्वलः-ज्वालः, जिज्वलिषुः, जाज्वलः ;

ज्वलितव्यम्, ज्वलयितव्यम्-ज्वालयितव्यम्-प्रज्वलयितव्यम्, जिज्वलिषितव्यम्, जाज्वलितव्यम् ;

ज्वलनीयम्, ज्वलनीयम्-ज्वालनीयम्-प्रज्वलनीयम्, जिज्वलिषणीयम्, जाज्वलनीयम् ;

ज्वाल्यम्, ज्वल्यम्-ज्वाल्यम्-प्रज्वल्यम्, जिज्वलिष्यम्, जाज्वल्यम् ;

ईषज्ज्वलः-दुर्ज्वलः-सुज्वलः ; — — —

ज्वल्यमानः, ज्वल्यमानः-ज्वाल्यमानः-प्रज्वल्यमानः, जिज्वलिष्यमाणः, जाज्वल्यमानः ;

ज्वालः, ज्वलः-ज्वालः-प्रज्वलः, जिज्वलिषः, जाज्वलः ;

ज्वलितुम्, ज्वलयितुम्-ज्वालयितुम्-प्रज्वलयितुम्, जिज्वलिषितुम्, जाज्वलितुम् ;

[5]ज्वलितिः, ज्वलना-ज्वालना-प्रज्वलना, जिज्वलिषा, जाज्वला ;

---

1. 'न पदान्ताः परेऽणः सन्ति' इति पक्षो भाष्यासम्मतः। अतोऽत्र पदान्ते लकारश्रवणं न दोषाय।
2. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि वा णप्रत्ययो भवति। स्त्रियां 'अजाद्यतष्टाप्' (4-1-4) इति टाप्। णप्रत्ययाभावपक्षे तु पचाद्यचि (3-1-134), ज्वलः इत्यपि भवति।
3. 'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः' (3-2-150) इति ताच्छीलिको युच्। अनादेशः। ज्वलनः = अग्निः।
4. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः।
5. 'तितुत्रेष्वग्रहादीनामिति वक्तव्यम्' (वा. 7-2-9) इति पर्युदासात् भणितिः इत्यत्रेव इडागमो भवति।

A. 'वनाम किं प्रज्वलितो हरेण सोऽद्यापि यद्विह्वलयन्ननङ्गः॥' धा. का. 2.10.

B. 'ज्वालेन तापेन चला जडाङ्गीरटालशोकट्वलितप्रतापाः॥' धा. का. 2.21.

C. 'लिम्पैरिव तनोर्वातैश्चेतयः स्याज्ज्वलो न कः॥' भ. का. 6.80.